# Shri Subrahmanya Sahasranamastotram

# શ્રીસુબ્રહ્મણ્યસહસ્રનામસ્તોત્રમ્ માર્કણ્ડેયપ્રોક્તમ્

## Document Information

Text title : Subrahmanya Sahasranama Stotram 1

File name : subrahmaNyasahasranAmastotra.itx

Category : sahasranAma, subrahmanya, stotra

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Description-comments : See corresponding nAmAvalI. From shrIsubrahamNyastutimanjarI published by Shri

Latest update : August 24, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2025

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યસહસ્રનામસ્તોત્રમ્ માર્કણ્ડેયપ્રોક્તમ્

સ્વામિમલૈ સહસ્રનામસ્તોત્રમ્

ૐ શ્રી ગણેશાય નમઃ ।

અસ્ય શ્રી સુબ્રહ્મણ્ય સહસ્રનામસ્તોત્રમહામન્ત્રસ્ય, માર્કણ્ડેય ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રી સુબ્રહ્મણ્યો દેવતા । શરજન્માઽક્ષય ઇતિ બીજં,
શક્તિધરોઽક્ષય ઇતિ શક્તિઃ । કાર્તિકેય ઇતિ કીલકમ્ ।
ક્રૌઞ્ચભેદીત્યર્ગલમ્ । શિખિવાહન ઇતિ કવચમ્, ષણ્મુખ ઇતિ ધ્યાનમ્ ।
શ્રી સુબ્રહ્મણ્ય પ્રસાદ સિદ્ધ્યર્થે નામ પારાયણે વિનિયોગઃ ।

કરન્યાસઃ

ૐ શં ઓઙ્કારસ્વરૂપાય ઓજોધરાય ઓજસ્વિને સુહૃદ્યાય
હૃષ્ટચિત્તાત્મને ભાસ્વદ્રૂપાય અઙ્ગુષ્ઠાભ્યાં નમઃ । var ભાસ્વરૂપાય
ૐ રં ષટ્કોણ મધ્યનિલયાય ષટ્કિરીટધરાય શ્રીમતે ષડાધારાય
ષડાનનાય લલાટષણ્ણેત્રાય અભયવરદહસ્તાય તર્જનીભ્યાં નમઃ ।
ૐ વં ષણ્મુખાય શરજન્મને શુભલક્ષણાય શિખિવાહનાય
ષડક્ષરાય સ્વામિનાથાય મધ્યમાભ્યાં નમઃ ।
ૐ ણં કૃશાનુસમ્ભવાય કવચિને કુક્કુટધ્વજાય
શૂરમર્દનાય કુમારાય સુબ્રહ્મણ્યાય (સુબ્રહ્મણ્ય) અનામિકાભ્યાં નમઃ ।
ૐ ભં કન્દર્પકોટિદિવ્યવિગ્રહાય દ્વિષડ્બાહવે દ્વાદશાક્ષાય
મૂલપ્રકૃતિરહિતાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ વં સચ્ચિદાનન્દસ્વરૂપાય સર્વરૂપાત્મને ખેટધરાય ખડ્ગિને
શક્તિહસ્તાય બ્રહ્મૈકરૂપિણે કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

એવં હૃદયાદિન્યાસઃ । ૐ ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ।

ધ્યાનમ્ -

ધ્યાયેત્ષણ્મુખમિન્દુકોટિસદૃશં રત્નપ્રભાશોભિતં var વન્દે ષણ્મુખ
બાલાર્કદ્યુતિ ષટ્કિરીટવિલસત્કેયૂર હારાન્વિતમ્ ।

કર્ણાલમ્બિત કુણ્ડલ પ્રવિલસદ્ગણ્ડસ્થલૈઃ શોભિતં ?? was missing la?
કાઞ્ચી કઙ્કણકિઙ્કિણીરવયુતં શ‍ૃઙ્ગારસારોદયમ્ ॥
ષડ્વક્ત્રં શિખિવાહનં ત્રિનયનં ચિત્રામ્બરાલઙ્કૃતં
વજ્રં શક્તિમસિં ત્રિશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ।
પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં સદા ?de?
ધ્યાયામીપ્સિત સિદ્ધિદં શિવસુતં સ્કન્દં સુરારાધિતમ્ ॥
દ્વિષડ્ભુજં ષણ્મુખમમ્બિકાસુતં કુમારમાદિત્ય સહસ્રતેજસમ્ ।
વન્દે મયૂરાસનમગ્નિસમ્ભવં સેનાન્યમદ્યાહમભીષ્ટસિદ્ધયે ॥

અથ લમિત્યાદિ પઞ્ચપૂજા ।
લં પૃથિવ્યાત્મને ગન્ધં કલ્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ કલ્પયામિ ।
યં વાય્વાત્મને ધૂપં કલ્પયામિ ।
રં અગ્ન્યાત્મને દીપં કલ્પયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં કલ્પયામિ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારપૂજાન્ કલ્પયામિ ॥

અથ સ્તોત્રમ્ ।
ૐ સુબ્રહ્મણ્યઃ સુરેશાનઃ સુરારિકુલનાશનઃ ।
બ્રહ્મણ્યો બ્રહ્મવિદ્ બ્રહ્મા બ્રહ્મવિદ્યાગુરૂર્ગુરુઃ ॥ ૧॥

ઈશાનગુરુરવ્યક્તો વ્યક્તરૂપઃ સનાતનઃ ।
પ્રધાનપુરુષઃ કર્તા કર્મ કાર્યં ચ કારણમ્ ॥ ૨॥

અધિષ્ઠાનં ચ વિજ્ઞાનં ભોક્તા ભોગશ્ચ કેવલઃ ।
અનાદિનિધનઃ સાક્ષી નિયન્તા નિયમો યમઃ ॥ ૩॥

વાક્પતિર્વાક્પ્રદો વાગ્મી વાચ્યો વાગ્વાચકસ્તથા ।
પિતામહગુરુર્લોકગુરુસ્તત્વાર્થબોધકઃ ॥ ૪॥

પ્રણવાર્થોપદેષ્ટા ચાપ્યજો બ્રહ્મ સનાતનઃ ।
વેદાન્તવેદ્યો વેદાત્મા વેદાદિર્વેદબોધકઃ ॥ ૫॥

વેદાન્તો વેદગુહ્યશ્ચ વેદશાસ્ત્રાર્થબોધકઃ ।
સર્વવિદ્યાત્મકઃ શાન્તશ્ચતુષ્ષષ્ટિકલાગુરુઃ ॥ ૬॥

મન્ત્રાર્થો મન્ત્રમૂર્તિશ્ચ મન્ત્રતન્ત્રપ્રવર્તકઃ ।

મન્ત્રી મન્ત્રો મન્ત્રબીજં મહામન્ત્રોપદેશકઃ ॥ ૭॥

મહોત્સાહો મહાશક્તિર્મહાશક્તિધરઃ પ્રભુઃ ।
જગત્સ્રષ્ટા જગદ્ભર્તા જગન્મૂર્તિર્જગન્મયઃ ॥ ૮॥

જગદાદિરનાદિશ્ચ જગદ્બીજં જગદ્ગુરુઃ ।
જ્યોતિર્મયઃ પ્રશાન્તાત્મા સચ્ચિદાનન્દવિગ્રહઃ ॥ ૯॥

સુખમૂર્તિઃ સુખકરઃ સુખી સુખકરાકૃતિઃ ।
જ્ઞાતા જ્ઞેયો જ્ઞાનરૂપો જ્ઞપ્તિર્જ્ઞાનબલં બુધઃ ॥ ૧૦॥

વિષ્ણુર્જિષ્ણુર્ગ્રસિષ્ણુશ્ચ પ્રભવિષ્ણુઃ સહિષ્ણુકઃ ।
વર્ધિષ્ણુર્ભૂષ્ણુરજરસ્તિતિક્ષ્ણુઃ ક્ષાન્તિરાર્જવમ્ ॥ ૧૧॥

ઋજુઃ સુગમ્યઃસુલભો દુર્લભો લાભ ઈપ્સિતઃ ।
વિજ્ઞો વિજ્ઞાનભોક્તા ચ શિવજ્ઞાનપ્રદાયકઃ ॥ ૧૨॥

મહદાદિરહઙ્કારો ભૂતાદિર્ભૂતભાવનઃ ।
ભૂતભવ્ય ભવિષ્યચ્ચ ભૂત ભવ્યભવત્પ્રભુઃ ॥ ૧૩॥

દેવસેનાપતિર્નેતા કુમારો દેવનાયકઃ ।
તારકારિર્મહાવીર્યઃ સિંહવક્ત્રશિરોહરઃ ॥ ૧૪॥

અનેકકોટિબ્રહ્માણ્ડ પરિપૂર્ણાસુરાન્તકઃ ।
સુરાનન્દકરઃ શ્રીમાનસુરાદિભયઙ્કરઃ ॥ ૧૫॥

અસુરાન્તઃ પુરાક્રન્દકરભેરીનિનાદનઃ ।
સુરવન્દ્યો જનાનન્દકરશિઞ્જન્મણિધ્વનિઃ ॥ ૧૬॥

સ્ફુટાટ્ટહાસસઙ્ક્ષુભ્યત્તારકાસુરમાનસઃ ।
મહાક્રોધો મહોત્સાહો મહાબલપરાક્રમઃ ॥ ૧૭॥

મહાબુદ્ધિર્મહાબાહુર્મહામાયો મહાધૃતિઃ ।
રણભીમઃ શત્રુહરો ધીરોદાત્તગુણોત્તરઃ ॥ ૧૮॥

મહાધનુર્મહાબાણો મહાદેવપ્રિયાત્મજઃ ।
મહાખડ્ગો મહાખેટો મહાસત્વો મહાદ્યુતિઃ ॥ ૧૯॥

મહર્ધિશ્ચ મહામાયી મયૂરવરવાહનઃ ।
મયૂરબર્હાતપત્રો મયૂરનટનપ્રિયઃ ॥ ૨૦॥

મહાનુભાવોઽમેયાત્માઽમેયશ્રીશ્ચ મહાપ્રભુઃ ।
સુગુણો દુર્ગુણદ્વેષી નિર્ગુણો નિર્મલોઽમલઃ ॥ ૨૧॥

સુબલો વિમલઃ કાન્તઃ કમલાસન પૂજિતઃ ।
કાલઃ કમલપત્રાક્ષઃ કલિકલ્મષનાશનઃ ॥ ૨૨॥

મહારણો મહાયોદ્ધા મહાયુદ્ધપ્રિયોઽભયઃ ।
મહારથો મહાભાગો ભક્તાભીષ્ટફલપ્રદઃ ॥ ૨૩॥

ભક્તપ્રિયઃ પ્રિયઃ પ્રેમ પ્રેયાન્ પ્રીતિધરઃ સખા ।
ગૌરીકરસરોજાગ્ર લાલનીય મુખામ્બુજઃ ॥ ૨૪॥

કૃત્તિકાસ્તન્યપાનૈકવ્યગ્રષડ્વદનામ્બુજઃ ।
ચન્દ્રચૂડાઙ્ગભૂભાગ વિહારણવિશારદઃ ॥ ૨૫॥

ઈશાનનયનાનન્દકન્દલાવણ્યનાસિકઃ ।
ચન્દ્રચૂડકરામ્ભોજ પરિમૃષ્ટભુજાવલિઃ ॥ ૨૬॥

લમ્બોદર સહક્રીડા લમ્પટઃ શરસમ્ભવઃ ।
અમરાનનનાલીક ચકોરીપૂર્ણ ચન્દ્રમાઃ ॥ ૨૭॥

સર્વાઙ્ગ સુન્દરઃ શ્રીશઃ શ્રીકરઃ શ્રીપ્રદઃ શિવઃ ।
વલ્લીસખો વનચરો વક્તા વાચસ્પતિર્વરઃ ॥ ૨૮॥

ચન્દ્રચૂડો બર્હિપિઞ્છ શેખરો મકુટોજ્જ્વલઃ ।
ગુડાકેશઃ સુવૃત્તોરુશિરા મન્દારશેખરઃ ॥ ૨૯॥

બિમ્બાધરઃ કુન્દદન્તો જપાશોણાગ્રલોચનઃ ।
ષડ્દર્શનીનટીરઙ્ગરસનો મધુરસ્વનઃ ॥ ૩૦॥

મેઘગમ્ભીરનિર્ઘોષઃ પ્રિયવાક્ પ્રસ્ફુટાક્ષરઃ ।
સ્મિતવક્ત્રશ્ચોત્પલાક્ષશ્ચારુગમ્ભીરવીક્ષણઃ ॥ ૩૧॥

કર્ણાન્તદીર્ઘનયનઃ કર્ણભૂષણ ભૂષિતઃ ।
સુકુણ્ડલશ્ચારુગણ્ડઃ કમ્બુગ્રીવો મહાહનુઃ ॥ ૩૨॥

પીનાંસો ગૂઢજત્રુશ્ચ પીનવૃત્તભુજાવલિઃ ।
રક્તાઙ્ગો રત્નકેયૂરો રત્નકઙ્કણભૂષિતઃ॥ ૩૩॥

જ્યાકિણાઙ્ક લસદ્વામપ્રકોષ્ઠવલયોજ્જ્વલઃ ।
રેખાઙ્કુશધ્વજચ્છત્રપાણિપદ્મો મહાયુધઃ ॥ ૩૪॥

સુરલોક ભયધ્વાન્ત બાલારુણકરોદયઃ ।
અઙ્ગુલીયકરત્નાંશુ દ્વિગુણોદ્યન્નખાઙ્કુરઃ ॥ ૩૫॥

પીનવક્ષા મહાહારો નવરત્નવિભૂષણઃ ।
હિરણ્યગર્ભો હેમાઙ્ગો હિરણ્યકવચો હરઃ ॥ ૩૬॥

હિરણ્મય શિરસ્ત્રાણો હિરણ્યાક્ષો હિરણ્યદઃ ।
હિરણ્યનાભિસ્ત્રિવલી લલિતોદરસુન્દરઃ ॥ ૩૭॥

સુવર્ણસૂત્રવિલસદ્વિશઙ્કટકટીતટઃ ।
પીતામ્બરધરો રત્નમેખલાવૃત મધ્યકઃ ॥ ૩૮॥

પીવરાલોમવૃત્તોદ્યત્સુજાનુર્ગુપ્તગુલ્ફકઃ ।
શઙ્ખચક્રાબ્જકુલિશધ્વજરેખાઙ્ઘ્રિપઙ્કજઃ ॥ ૩૯॥

નવરત્નોજ્જ્વલત્પાદકટકઃ પરમાયુધઃ ।
સુરેન્દ્રમકુટપ્રોદ્યન્મણિ રઞ્જિતપાદુકઃ ॥ ૪૦॥

પૂજ્યાઙ્ઘ્રિશ્ચારુનખરો દેવસેવ્યસ્વપાદુકઃ ।
પાર્વતીપાણિ કમલપરિમૃષ્ટપદામ્બુજઃ ॥ ૪૧॥

મત્તમાતઙ્ગ ગમનો માન્યો માન્યગુણાકરઃ ।
ક્રૌઞ્ચ દારણદક્ષૌજાઃ ક્ષણઃ ક્ષણવિભાગકૃત્ ॥ ૪૨॥

સુગમો દુર્ગમો દુર્ગો દુરારોહોઽરિદુઃ સહઃ ।
સુભગઃ સુમુખઃ સૂર્યઃ સૂર્યમણ્ડલમધ્યગઃ ॥ ૪૩॥

સ્વકિઙ્કરોપસંસૃષ્ટસૃષ્ટિસંરક્ષિતાખિલઃ ।
જગત્સ્રષ્ટા જગદ્ભર્તા જગત્સંહારકારકઃ ॥ ૪૪॥

સ્થાવરો જઙ્ગમો જેતા વિજયો વિજયપ્રદઃ ।
જયશીલો જિતારાતિર્જિતમાયો જિતાસુરઃ ॥ ૪૫॥

જિતકામો જિતક્રોધો જિતમોહસ્સુમોહનઃ ।
કામદઃ કામભૃત્કામી કામરૂપઃ કૃતાગમઃ ॥ ૪૬॥

કાન્તઃ કલ્યઃ કલિધ્વંસી કલ્હારકુસુમપ્રિયઃ ।
રામો રમયિતા રમ્યો રમણીજનવલ્લભઃ ॥ ૪૭॥

રસજ્ઞો રસમૂર્તિશ્ચ રસો નવરસાત્મકઃ ।

રસાત્મા રસિકાત્મા ચ રાસક્રીડાપરો રતિઃ ॥ ૪૮॥

સૂર્યકોટિપ્રતીકાશઃ સોમસૂર્યાગ્નિલોચનઃ ।
કલાભિજ્ઞઃ કલારૂપી કલાપી સકલપ્રભુઃ ॥ ૪૯॥

બિન્દુર્નાદઃ કલામૂર્તિઃ કલાતીતોઽક્ષરાત્મકઃ ।
માત્રાકારઃ સ્વરાકારઃ એકમાત્રો દ્વિમાત્રકઃ ॥ ૫૦॥

ત્રિમાત્રકશ્ચતુર્માત્રો વ્યક્તઃ સન્ધ્યક્ષરાત્મકઃ ।
વ્યઞ્જનાત્મા વિયુક્તાત્મા સંયુક્તાત્મા સ્વરાત્મકઃ ॥ ૫૧॥

વિસર્જનીયોઽનુસ્વારઃ સર્વવર્ણતનુર્મહાન્ ।
અકારાત્માઽપ્યુકારાત્મા મકારાત્મા ત્રિવર્ણકઃ ॥ ૫૨॥

ઓઙ્કારોઽથ વષટ્કારઃ  સ્વાહાકારઃ સ્વધાકૃતિઃ ।
આહુતિર્હવનં હવ્યં હોતાઽધ્વર્યુર્મહાહવિઃ ॥ ૫૩॥

બ્રહ્મોદ્ગાતા સદસ્યશ્ચ બર્હિરિધ્મં સમિચ્ચરુઃ ।
કવ્યં પશુઃ પુરોડાશઃ આમિક્ષા વાજવાજિનમ્ ॥ ૫૪॥

પવનઃ પાવનઃ પૂતઃ પવમાનઃ પરાકૃતિઃ ।
પવિત્રં પરિધિઃ પૂર્ણપાત્રમુદ્ભૂતિરિન્ધનમ્ ॥ ૫૫॥

વિશોધનં પશુપતિઃ પશુપાશવિમોચકઃ ।
પાકયજ્ઞો મહાયજ્ઞો યજ્ઞો યજ્ઞપતિર્યજુઃ ॥ ૫૬॥

યજ્ઞાઙ્ગો યજ્ઞગમ્યશ્ચ યજ્વા યજ્ઞફલપ્રદઃ ।
યજ્ઞાઙ્ગભૂર્યજ્ઞપતિર્યજ્ઞશ્રીર્યજ્ઞવાહનઃ ॥ ૫૭॥

યજ્ઞરાડ્ યજ્ઞવિધ્વંસી યજ્ઞેશો યજ્ઞરક્ષકઃ ।
સહસ્રબાહુઃ સર્વાત્મા સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૫૮॥

સહસ્રવદનો નિત્યઃ સહસ્રાત્મા વિરાટ્ સ્વરાટ્ ।
સહસ્રશીર્ષો વિશ્વશ્ચ તૈજસઃ પ્રાજ્ઞ આત્મવાન્ ॥ ૫૯॥

અણુર્બૃહત્કૃશઃ સ્થૂલો દીર્ઘો હ્રસ્વશ્ચ વામનઃ ।
સૂક્ષ્મઃ સૂક્ષ્મતરોઽનન્તો વિશ્વરૂપો નિરઞ્જનઃ ॥ ૬૦॥

અમૃતેશોઽમૃતાહારોઽમૃતદાતાઽમૃતાઙ્ગવાન્ ।
અહોરૂપસ્ત્રિયામા ચ સન્ધ્યારૂપો દિનાત્મકઃ ॥ ૬૧॥

અનિમેષો નિમેષાત્મા કલા કાષ્ઠા ક્ષણાત્મકઃ ।
મુહૂર્તો ઘટિકારૂપો યામો યામાત્મકસ્તથા ॥ ૬૨ ॥

પૂર્વાહ્ણરૂપો મધ્યાહ્નરૂપઃ સાયાહ્નરૂપકઃ ।
અપરાહ્ણોઽતિનિપુણઃ સવનાત્મા પ્રજાગરઃ ॥ ૬૩ ॥

વેદ્યો વેદયિતા વેદો વેદદૃષ્ટો વિદાં વરઃ ।
વિનયો નયનેતા ચ વિદ્વજ્જનબહુપ્રિયઃ ॥ ૬૪ ॥

વિશ્વગોપ્તા વિશ્વભોક્તા વિશ્વકૃદ્વિશ્વભેષજમ્ ।
વિશ્વમ્ભરો વિશ્વપતિર્વિશ્વરાડ્વિશ્વમોહનઃ ॥ ૬૫ ॥

વિશ્વસાક્ષી વિશ્વહન્તા વીરો વિશ્વમ્ભરાધિપઃ ।
વીરબાહુર્વીરહન્તા વીરાગ્ર્યો વીરસૈનિકઃ ॥ ૬૬ ॥

વીરવાદપ્રિયઃ શૂર એકવીરઃ સુરાધિપઃ ।
શૂરપદ્માસુરદ્વેષી તારકાસુરભઞ્જનઃ ॥ ૬૭ ॥

તારાધિપસ્તારહારઃ શૂરહન્તાઽશ્વવાહનઃ ।
શરભઃ શરસમ્ભૂતઃ શક્તઃ શરવણેશયઃ ॥ ૬૮ ॥

શાઙ્કરિઃ શામ્ભવઃ શમ્ભુઃ સાધુઃ સાધુજનપ્રિયઃ ।
સારાઙ્ગઃ સારકઃ સર્વઃ શાર્વઃ શાર્વજનપ્રિયઃ ॥ ૬૯ ॥

ગઙ્ગાસુતોઽતિગમ્ભીરો ગમ્ભીરહૃદયોઽનઘઃ ।
અમોઘવિક્રમશ્ચક્રશ્ચક્રભૂઃ શક્રપૂજિતઃ ॥ ૭૦ ॥

ચક્રપાણિશ્ચક્રપતિશ્ચક્રવાલાન્તભૂપતિઃ ।
સાર્વભૌમસ્સુરપતિઃ સર્વલોકાધિરક્ષકઃ ॥ ૭૧ ॥

સાધુપઃ સત્યસઙ્કલ્પઃ સત્યસ્સત્યવતાં વરઃ ।
સત્યપ્રિયઃ સત્યગતિઃ સત્યલોકજનપ્રિયઃ ॥ ૭૨ ॥

ભૂતભવ્ય ભવદ્રૂપો ભૂતભવ્યભવત્પ્રભુઃ ।
ભૂતાદિર્ભૂતમધ્યસ્થો ભૂતવિધ્વંસકારકઃ ॥ ૭૩ ॥

ભૂતપ્રતિષ્ઠાસઙ્કર્તા ભૂતાધિષ્ઠાનમવ્યયઃ ।
ઓજોનિધિર્ગુણનિધિસ્તેજોરાશિરકલ્મષઃ ॥ ૭૪ ॥

કલ્મષઘ્નઃ કલિધ્વંસી કલૌ વરદવિગ્રહઃ ।
કલ્યાણમૂર્તિઃ કામાત્મા કામક્રોધવિવર્જિતઃ ॥ ૭૫ ॥

ગોપ્તા ગોપાયિતા ગુપ્તિર્ગુણાતીતો ગુણાશ્રયઃ ।
સત્વમૂર્તી રજોમૂર્તિસ્તમોમૂર્તિશ્ચિદાત્મકઃ ॥ ૭૬॥

દેવસેનાપતિર્ભૂમા મહિમા મહિમાકરઃ ।
પ્રકાશરૂપઃ પાપઘ્નઃ પવનઃ પાવનોઽનલઃ ॥ ૭૭॥

કૈલાસનિલયઃ કાન્તઃ કનકાચલ કાર્મુકઃ ।
નિર્ધૂતો દેવભૂતિશ્ચ વ્યાકૃતિઃ ક્રતુરક્ષકઃ ॥ ૭૮॥

ઉપેન્દ્ર ઇન્દ્રવન્દ્યાઙ્ઘ્રિરુરુજઙ્ઘ ઉરુક્રમઃ ।
વિક્રાન્તો વિજયક્રાન્તો વિવેકવિનયપ્રદઃ ॥ ૭૯॥

અવિનીતજનધ્વંસી સર્વાવગુણવર્જિતઃ ।
કુલશૈલૈકનિલયો વલ્લીવાઞ્છિતવિભ્રમઃ ॥ ૮૦॥

શામ્ભવઃ શમ્ભુતનયઃ શઙ્કરાઙ્ગવિભૂષણઃ ।
સ્વયમ્ભૂઃ સ્વવશઃ સ્વસ્થઃ પુષ્કરાક્ષઃ પુરૂદ્ભવઃ ॥ ૮૧॥

મનુર્માનવગોપ્તા ચ સ્થવિષ્ઠઃ સ્થવિરો યુવા ।
બાલઃ શિશુર્નિત્યયુવા નિત્યકૌમારવાન્ મહાન્ ॥ ૮૨॥

અગ્રાહ્યરૂપો ગ્રાહ્યશ્ચ સુગ્રહઃ સુન્દરાકૃતિઃ ।
પ્રમર્દનઃ પ્રભૂતશ્રીર્લોહિતાક્ષોઽરિમર્દનઃ ॥ ૮૩॥

ત્રિધામા ત્રિકકુત્ત્રિશ્રીઃ ત્રિલોકનિલયોઽલયઃ ।
શર્મદઃ શર્મવાન્ શર્મ શરણ્યઃ શરણાલયઃ ॥ ૮૪॥

સ્થાણુઃ સ્થિરતરઃ સ્થેયાન્ સ્થિરશ્રીઃ સ્થિરવિક્રમઃ ।
સ્થિરપ્રતિજ્ઞઃ સ્થિરધીર્વિશ્વરેતાઃ પ્રજાભવઃ ॥ ૮૫॥

અત્યયઃ પ્રત્યયઃ શ્રેષ્ઠઃ સર્વયોગવિનિઃસૃતઃ ।
સર્વયોગેશ્વરઃ સિદ્ધઃ સર્વજ્ઞઃ સર્વદર્શનઃ ॥ ૮૬॥

વસુર્વસુમના દેવો વસુરેતા વસુપ્રદઃ ।
સમાત્મા સમદર્શી ચ સમદઃ સર્વદર્શનઃ ॥ ૮૭॥

વૃષાકૃતિર્વૃષારૂઢો વૃષકર્મા વૃષપ્રિયઃ ।
શુચિઃ શુચિમનાઃ શુદ્ધઃ શુદ્ધકીર્તિઃ શુચિશ્રવાઃ ॥ ૮૮॥

રૌદ્રકર્મા મહારૌદ્રો રુદ્રાત્મા રુદ્રસમ્ભવઃ ।

અનેકમૂર્તિર્વિશ્વાત્માઽનેકબાહુરરિન્દમઃ ॥ ૮૯॥

વીરબાહુર્વિશ્વસેનો વિનેયો વિનયપ્રદઃ । vinayo??
સર્વગઃ સર્વવિત્સર્વઃ સર્વવેદાન્તગોચરઃ ॥ ૯૦॥

કવિઃ પુરાણોઽનુશાસ્તા સ્થૂલસ્થૂલ અણોરણુઃ ।
ભ્રાજિષ્ણુર્વિષ્ણુ વિનુતઃ કૃષ્ણકેશઃ કિશોરકઃ ॥ ૯૧॥

ભોજનં ભાજનં ભોક્તા વિશ્વભોક્તા વિશાં પતિઃ ।
વિશ્વયોનિર્વિશાલાક્ષો વિરાગો વીરસેવિતઃ ॥ ૯૨॥

પુણ્યઃ પુરુયશાઃ પૂજ્યઃ પૂતકીર્તિઃ પુનર્વસુઃ ।
સુરેન્દ્રઃ સર્વલોકેન્દ્રો મહેન્દ્રોપેન્દ્રવન્દિતઃ ॥ ૯૩॥

વિશ્વવેદ્યો વિશ્વપતિર્વિશ્વભૃદ્વિશ્વભેષજમ્ ।
મધુર્મધુરસઙ્ગીતો માધવઃ શુચિરૂષ્મલઃ ॥ ૯૪॥

શુક્રઃ શુભ્રગુણઃ શુક્લઃ શોકહન્તા શુચિસ્મિતઃ ।
મહેષ્વાસો વિષ્ણુપતિઃ મહીહન્તા મહીપતિઃ ॥ ૯૫॥

મરીચિર્મદનો માની માતઙ્ગગતિરદ્ભુતઃ ।
હંસઃ સુપૂર્ણઃ સુમનાઃ ભુજઙ્ગેશભુજાવલિઃ ॥ ૯૬॥

પદ્મનાભઃ પશુપતિઃ પારજ્ઞો વેદપારગઃ ।
પણ્ડિતઃ પરઘાતી ચ સન્ધાતા સન્ધિમાન્ સમઃ ॥ ૯૭॥

દુર્મર્ષણો દુષ્ટશાસ્તા દુર્ધર્ષો યુદ્ધધર્ષણઃ ।
વિખ્યાતાત્મા વિધેયાત્મા વિશ્વપ્રખ્યાતવિક્રમઃ ॥ ૯૮॥

સન્માર્ગદેશિકો માર્ગરક્ષકો માર્ગદાયકઃ ।
અનિરુદ્ધોઽનિરુદ્ધશ્રીરાદિત્યો દૈત્યમર્દનઃ ॥ ૯૯॥

અનિમેષોઽનિમેષાર્ચ્યસ્ત્રિજગદ્ગ્રામણીર્ગુણી ।
સમ્પૃક્તઃ સમ્પ્રવૃત્તાત્મા નિવૃત્તાત્માઽઽત્મવિત્તમઃ ॥ ૧૦૦॥

અર્ચિષ્માનર્ચનપ્રીતઃ પાશભૃત્પાવકો મરુત્ ।
સોમઃ સૌમ્યઃ સોમસુતઃ સોમસુત્સોમભૂષણઃ ॥ ૧૦૧॥

સર્વસામપ્રિયઃ સર્વસમઃ સર્વંસહો વસુઃ ।
ઉમાસૂનુરુમાભક્ત ઉત્ફુલ્લમુખપઙ્કજઃ ॥ ૧૦૨॥

અમૃત્યુરમરારાતિમૃત્યુર્મૃત્યુઞ્જયોઽજિતઃ ।
મન્દારકુસુમાપીડો મદનાન્તકવલ્લભઃ ॥ ૧૦૩॥

માલ્યવન્મદનાકારો માલતીકુસુમપ્રિયઃ ।
સુપ્રસાદઃ સુરારાધ્યઃ સુમુખઃ સુમહાયશાઃ ॥ ૧૦૪॥

વૃષપર્વા વિરૂપાક્ષો વિષ્વક્સેનો વૃષોદરઃ ।
મુક્તો મુક્તગતિર્મોક્ષો મુકુન્દો મુદ્ગલી મુનિઃ ॥ ૧૦૫॥

શ્રુતવાન્ સુશ્રુતઃ શ્રોતા શ્રુતિગમ્યઃ શ્રુતિસ્તુતઃ ।
વર્ધમાનો વનરતિર્વાનપ્રસ્થનિષેવિતઃ ॥ ૧૦૬॥

વાગ્મી વરો વાવદૂકો વસુદેવવરપ્રદઃ ।
મહેશ્વરો મયૂરસ્થઃ શક્તિહસ્તસ્ત્રિશૂલધૃત્ ॥ ૧૦૭॥

ઓજસ્તેજશ્ચ તેજસ્વી પ્રતાપઃ સુપ્રતાપવાન્ ।
ઋદ્ધિઃ સમૃદ્ધિઃ સંસિદ્ધિઃ સુસિદ્ધિઃ સિદ્ધસેવિતઃ ॥ ૧૦૮॥

અમૃતાશોઽમૃતવપુરમૃતોઽમૃતદાયકઃ ।
ચન્દ્રમાશ્ચન્દ્રવદનશ્ચન્દ્રદૃક્ ચન્દ્રશીતલઃ ॥ ૧૦૯॥

મતિમાન્નીતિમાન્નીતિઃ કીર્તિમાન્કીર્તિવર્ધનઃ ।
ઔષધં ચૌષધીનાથઃ પ્રદીપો ભવમોચનઃ ॥ ૧૧૦॥

ભાસ્કરો ભાસ્કરતનુર્ભાનુર્ભયવિનાશનઃ ।
ચતુર્યુગવ્યવસ્થાતા યુગધર્મપ્રવર્તકઃ ॥ ૧૧૧॥

અયુજો મિથુનં યોગો યોગજ્ઞો યોગપારગઃ ।
મહાશનો મહાભૂતો મહાપુરુષવિક્રમઃ ॥ ૧૧૨॥

યુગાન્તકૃદ્યુગાવર્તો દૃશ્યાદૃશ્યસ્વરૂપકઃ ।
સહસ્રજિન્મહામૂર્તિઃ સહસ્રાયુધપણ્ડિતઃ ॥ ૧૧૩॥

અનન્તાસુરસંહર્તા સુપ્રતિષ્ઠઃ સુખાકરઃ ।
અક્રોધનઃ ક્રોધહન્તા શત્રુક્રોધવિમર્દનઃ ॥ ૧૧૪॥

વિશ્વમુર્તિર્વિશ્વબાહુર્વિશ્વદૃગ્વિશ્વતો મુખઃ ।
વિશ્વેશો વિશ્વસંસેવ્યો દ્યાવાભૂમિવિવર્ધનઃ ॥ ૧૧૫॥

અપાન્નિધિરકર્તાઽન્નમન્નદાતાઽન્નદારુણઃ ।
અમ્ભોજમૌલિરુજ્જીવઃ પ્રાણઃ પ્રાણપ્રદાયકઃ ॥ ૧૧૬॥

સ્કન્દઃ સ્કન્દધરો ધુર્યો ધાર્યો ધૃતિરનાતુરઃ ।
આતુરૌષધિરવ્યગ્રો વૈદ્યનાથોઽગદઙ્કરઃ ॥ ૧૧૭॥

દેવદેવો બૃહદ્ભાનુઃ સ્વર્ભાનુઃ પદ્મવલ્લભઃ ।
અકુલઃ કુલનેતા ચ કુલસ્રષ્ટા કુલેશ્વરઃ ।૧૧૮॥
નિધિર્નિધિપ્રિયઃ શઙ્ખપદ્માદિનિધિસેવિતઃ ।
શતાનન્દઃ શતાવર્તઃ શતમૂર્તિઃ શતાયુધઃ ॥ ૧૧૯॥

પદ્માસનઃ પદ્મનેત્રઃ પદ્માઙ્ઘ્રિઃ પદ્મપાણિકઃ ।
ઈશઃ કારણકાર્યાત્મા સૂક્ષ્માત્મા સ્થૂલમૂર્તિમાન્ ॥ ૧૨૦॥

અશરીરી ત્રિશરીરી શરીરત્રયનાયકઃ ।
જાગ્રત્પ્રપઞ્ચાધિપતિઃ સ્વપ્નલોકાભિમાનવાન્ ॥ ૧૨૧॥

સુષુપ્ત્યવસ્થાભિમાની સર્વસાક્ષી તુરીયગઃ ।
સ્વાપનઃ સ્વવશો વ્યાપી વિશ્વમૂર્તિર્વિરોચનઃ ॥ ૧૨૨॥

વીરસેનો વીરવેષો વીરાયુધસમાવૃતઃ ।
સર્વલક્ષણલક્ષણ્યો લક્ષ્મીવાન્ શુભલક્ષણઃ ॥ ૧૨૩॥

સમયજ્ઞઃ સુસમય સમાધિજનવલ્લભઃ ।
અતુલોઽતુલ્યમહિમા શરભોપમવિક્રમઃ ॥ ૧૨૪॥

અહેતુર્હેતુમાન્હેતુઃ હેતુહેતુમદાશ્રયઃ ।
વિક્ષરો રોહિતો રક્તો વિરક્તો વિજનપ્રિયઃ ॥ ૧૨૫॥

મહીધરો માતરિશ્વા માઙ્ગલ્યમકરાલયઃ ।
મધ્યમાન્તાદિરક્ષોભ્યો રક્ષોવિક્ષોભકારકઃ ॥ ૧૨૬॥

ગુહો ગુહાશયો ગોપ્તા ગુહ્યો ગુણમહાર્ણવઃ ।
નિરુદ્યોગો મહોદ્યોગી નિર્નિરોધો નિરઙ્કુશઃ॥ ૧૨૭॥

મહાવેગો મહાપ્રાણો મહેશ્વરમનોહરઃ ।
અમૃતાશોઽમિતાહારો મિતભાષ્યમિતાર્થવાક્ ॥ ૧૨૮॥

અક્ષોભ્યઃ ક્ષોભકૃત્ક્ષેમઃ ક્ષેમવાન્ ક્ષેમવર્ધનઃ ।
ઋદ્ધ ઋદ્ધિપ્રદો મત્તો મત્તકેકિનિષૂદનઃ ॥ ૧૨૯॥

ધર્મો ધર્મવિદાં શ્રેષ્ઠો વૈકુણ્ઠો વાસવપ્રિયઃ ।

પરધીરોઽપરાક્રાન્ત પરિતુષ્ટઃ પરાસુહૃત્ ॥ ૧૩૦॥

રામો રામનુતો રમ્યો રમાપતિનુતો હિતઃ ।
વિરામો વિનતો વિદ્વાન્ વીરભદ્રો વિધિપ્રિયઃ ॥ ૧૩૧॥

વિનયો વિનયપ્રીતો વિમતોરુમદાપહઃ ।
સર્વશક્તિમતાં શ્રેષ્ઠઃ સર્વદૈત્યભયઙ્કરઃ ॥ ૧૩૨॥

શત્રુઘ્નઃશત્રુવિનતઃ શત્રુસઙ્ઘપ્રધર્ષકઃ ।
સુદર્શન ઋતુપતિર્વસન્તો માધવો મધુઃ ॥ ૧૩૩॥

વસન્તકેલિનિરતો વનકેલિવિશારદઃ ।
પુષ્પધૂલીપરિવૃતો નવપલ્લવશેખરઃ ॥ ૧૩૪॥

જલકેલિપરો જન્યો જહ્નુકન્યોપલાલિતઃ ।
ગાઙ્ગેયો ગીતકુશલો ગઙ્ગાપૂરવિહારવાન્ ॥ ૧૩૫॥

ગઙ્ગાધરો ગણપતિર્ગણનાથસમાવૃતઃ ।
વિશ્રામો વિશ્રમયુતો વિશ્વભુગ્વિશ્વદક્ષિણઃ ॥ ૧૩૬॥

વિસ્તારો વિગ્રહો વ્યાસો વિશ્વરક્ષણ તત્પરઃ ।
વિનતાનન્દ કારી ચ પાર્વતીપ્રાણનન્દનઃ ॥
વિશાખઃ ષણ્મુખઃ કાર્તિકેયઃ કામપ્રદાયકઃ ॥ ૧૩૭॥

ઇતિ શ્રીસુબ્રહ્મણ્યસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

। ૐ શરવણભવ ૐ ।

The sahasranAmastotram is practised in Swamimalai.
It is said that the benefits that one would get by visiting
Lord SwaminathA in Swamimalai could be attained by reciting
the Sahasranama by Markandeya since the name itself is called
as Swamimalai Sahasranama.

From shrIsubrahamNyastutima njarI published by Shri MahaperiyavAl Trust.
We are thankful for the quality religious publications by the trust
and providing for everyone’s use.
Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar, NA

*Shri Subrahmanya Sahasranamastotram*

pdf was typeset on February 11, 2025

Please send corrections to *sanskrit@cheerful.com*